# बोर्ड कृतिपत्रिका: मार्च 2022

## आमोद: (सम्पूर्ण - संस्कृतम्)

**Time: 3 Hours** **Marks: 80**

**सूचना:**

1. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
2. यथासूचनम् आकलनकृतय: व्याकरणकृतय: आरेखितव्या:।
3. आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

**प्रथम: विभाग: – सुगमसंस्कृतम्** **(8)**

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (5 त: 4)** **[4]**

(1) 

(2) 

(3) 

(4) 

(5) 

**(आ) सङ्ख्या: अक्षरै:/अङ्कै: लिखत। (3 त: 2)** **[2]**

(1) ४९

(2) षट्सप्तति:

(3) १०

**(इ) समय-स्तम्भमेलनं कुरुत।** **[2]**

| | अ | आ |
|---|---|---|
| (1) | सार्ध-नववादनम् | १:०० |
| (2) | पादोन-त्रिवादनम् | ५.१५ |
| (3) | सपाद-पञ्चवादनम् | ९.३० |
| (4) | एकवादनम् | २.४५ |

## द्वितीयः विभागः – गद्यम् (20)

**2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। [7]**

अस्ति एकं चम्पकं नाम अरण्यम्। अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः। क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः। मृगशृगालौ दृष्ट्वा काकोऽवदत्, "सखे, चित्राङ्ग! कोऽयं द्वितीयः?" मृगः अब्रूत, "जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।" काकः उपादिशत्, "अकस्मादागन्तुना सह मित्रता न युक्ता।" तदाकर्ण्य जम्बूकः सकोपम् आह, "मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।" मृगः अब्रवीत्, "अलं विवादेन। वयं सर्वे आनन्देन एकत्र निवसामः।" काकेनोक्तम्, "एवमस्तु।"

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्। तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः।

**(1) अवबोधनम्। (4 तः 3)** **3**

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत। 1

शृगालः मृगेण सह मित्रताम् ऐच्छत् यतः ________ ।

(1) तस्य मृगे प्रीतिः आसीत्।

(2) तस्य स्वार्थहेतुः आसीत्।

(ख) कः कं वदति? 1

"दर्शयामि त्वाम्।"

(ग) पूर्णवाक्येन उत्तरं लिखत। 1

अरण्ये कौ निवसतः स्म?

(घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत। 1

<u>जम्बूकः</u> सकोपम् आह।

**(2) शब्दज्ञानम्। (3 तः 2)** **2**

(क) गद्यांशात् 2 पूर्वकालवाचक-धातुसाधित-त्वान्त अव्यये चित्वा लिखत। 1

(ख) प्रश्ननिर्माणं कुरुत। 1

<u>क्षेत्रपतिना</u> पाशः योजितः।

(ग) लकारं लिखत। 1

मृगः <u>अब्रूत</u>, "जम्बुकोऽयम्।"

**(3) पृथक्करणम्।** **2**

क्रमेण योजयत।

(1) काकस्य उपदेशः।

(2) मृगकाकशृगालानाम् एकत्र निवासः।

(3) शृगालस्य मृगेण सह मित्रता।

(4) मृगकाकयोः स्नेहेन निवासः।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[7]**

| | | |
|---|---|---|
| अर्णवः | – | (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, भवान्। |
| पिता | – | अधुना इमं तण्डुलं विभज। |
| अर्णवः | – | तात, कियान् लघुः अस्ति एषः। पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया। |
| पिता | – | इतोऽपि लघुतरः भागः कर्तुं शक्यते वा? |
| अर्णवः | – | यदि क्रियेत तर्हि चूर्णं भवेत् तस्य। |
| पिता | – | सम्यग् उक्तं त्वया। यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरः भागः प्राप्तुं न शक्यते सः एव परमः अणुः। |
| अर्णवः | – | द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः सत्यं खलु? |
| पिता | – | सत्यम्। अयं खलु कणादमहर्षेः सिद्धान्तः। अपि जानासि? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम्। तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके। |
| अर्णवः | – | तात, महर्षिणा कणादेन किं किम् उक्तं परमाणु विषये? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः। |
| पिता | – | कणादमुनिना प्रतिपादितम्–परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता। |

**(1) अवबोधनम्। (4 तः 3)** **3**

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। 1

(1) अणुभ्यः ________ परमाणवः। (सूक्ष्मतराः/स्थूलतराः)

(2) तेन ________ व्याख्या कृता। (परमाणोः/त्रिकोणस्य)

(ख) पूर्णवाक्येन उत्तरं लिखत। 1

परमाणुसिद्धान्तः केन महर्षिणा कथितः?

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

अर्णवः पाकगृहात् मोदकान् आनयति।

(घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः? 1

**(2) शब्दज्ञानम्। (3 तः 2)** **2**

(क) गद्यांशात् 2 तृतीया विभक्त्यन्तपदे चित्वा लिखत। 1

(ख) गद्यांशात् विशेषणं चित्वा लिखत। 1

(1) ________ घटकः।

(2) ________ तत्त्वम्।

(ग) पूर्वपदं लिखत। 1

(1) इतोऽपि = ________ + अपि।

(2) तथेति = ________ + इति।

**(3) पृथक्करणम्।** **2**

जालरेखाचित्रं पूरयत।



**(इ) माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** **[4]**

(1) वैखानसः – (राजानम् अवरुध्य) राजन्! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः। आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम्।

दुष्यन्तः – प्रतिसंहृत एषः सायकः। (यथोक्तं करोति)

वैखानसः – राजान्! समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः।

(2) रदनिका – एहि वत्स! शकटिकया क्रीडावः।

दारकः – (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि।

रदनिका – (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि।

**(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** [2]

(1) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

(2) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा?

## तृतीयः विभागः- पद्यम्। **(18)**

**3. (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्।।

यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः।।

**(1) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 तः 2)** **2**

**(क) पूर्णवाक्येन उत्तरं लिखत।** 1

नरः किं छिन्द्यात्?

**(ख) विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | **अ** | **आ** |
|---|---|---|
| (1) | सर्वे | नद्यः |
| (2) | सकलाः | पुरुषः |
| | | धर्माः |

**(ग) पूर्वपदं/उत्तरपदं लिखत।** 1

(1) पुरुषो भवेत् = ________ + भवेत्।

(2) कुर्याद्रासभरोहणम् = कुर्यात् + ________।

(2) **जालरेखाचित्रं पूरयत।** 2




**(आ) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** **[2]**

(1) 'यथा चतुर्भिः कनकं परीक्ष्यते ________' इति श्लोकस्य स्पष्टीकरणं लिखत।

(2) कं संजघान कृष्णः ________' इति श्लोकं स्पष्टीकुरुत।

**(इ) पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)** **[6]**

(1) (क) रथस्यैकं ________ नोपकरणे।। 4

**अथवा**

(ख) रामभिषेके ________ ठठं ठः।।

(2) (ग) वैद्यराज ............... धनानि च।। २

**अथवा**

(घ) यत्र विद्वज्जनो ............... द्रुमायते।। 2

**(ई) अन्वयं पूरयत।** **[2]**

.......................... अतिवक्ता न स्यात्, अधमः .......................... भाषते। .......................... कांस्ये (ध्वनिः) प्रजायते तादृक् ध्वनिः .......................... न (प्रजायते)।

**(उ) माध्यमभाषया सरलार्थं लिखत। (3 तः 2)** **[4]**

(1) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्। 2
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः।।

(2) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च। 2
उत्साहो वर्धते येन वाचनं तद् हितावहम्।।

(3) सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा। 2
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा।।

## चतुर्थः विभागः- लेखनकौशलम्। (9)

4\. **(अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 तः 4)** [4]

| | | |
|---|---|---|
| (क) विना | (ख) नमः | (ग) अधः |
| (घ) याच् (आ.प.) | (च) कथ् (उ.प.) | (छ) प्रति + श्रु (प.प.) |

**अथवा**

**संस्कृतानुवादं कुरुत। (6 त: 4)**

(1) कार्यक्रम कधी सुरू होईल?
कार्यक्रम कब शुरू होगा?
When will the programme start?

(2) काळे मेघ पाऊस पाडतात.
काले मेघ पानी बरसाते हैं।
Black clouds shower rain.

(3) सैनिक देशाचे रक्षण करतो.
सैनिक देश की रक्षा करता है।
A soldier protects the nation.

(4) तुझ्या भावाचे नाव सांग.
तुम्हारे भाई का नाम बताओ।
Tell your brother’s name.

(5) मी मैदानावर खेळतो.
मैं मैदान में खेलता हूँ।
I play on the ground.

(6) महाराष्ट्रात गोदावरी नावाची प्रसिद्ध नदी आहे.
महाराष्ट्र में गोदावरी नाम की प्रसिद्ध नदी है।
Godavari is famous river in Maharashtra.

**(आ) 5/7 वाक्यात्मकं निबन्धं लिखत। (3 त: 1)** [5]

(1) मम प्रिया भाषा। (2) मम प्रिय: नेता:। (3) मम प्रिय: उत्सव:।

**अथवा**

**साहाय्यक-शब्दानाम् आधारेण 5 / 7 वाक्यात्मकं चित्रवर्णनं कुरुत।**




(मञ्जूषा- आरोहति, अवरोहति, पठति, उपविशति, वहति, विक्रीणीते, भ्रमति, तिष्ठति)

## पञ्चमः विभागः – भाषाभ्यासः (17)

**5. (अ) तालिकापूर्तिं कुरुत।** **[8]**

**(1) नामतालिका। (6 तः 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| दिशः | ........................... | ........................... | षष्ठी |
| ........................... | ........................... | जन्मभ्यः | चतुर्थी |
| ........................... | माले | ........................... | प्रथमा |

**(2) सर्वनामतालिका। (6 तः 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| त्वया | ........................... | ........................... | तृतीया |
| ........................... | भवतोः | ........................... | सप्तमी |
| ........................... | ........................... | काः | द्वितीया |

**(3) क्रियापदतालिका। (6 तः 4)** **2**

| लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लङ् | ........................... | ........................... | अखादन् | प्रथमः |
| लोट् | कुरु | ........................... | ........................... | मध्यमः |
| लृट् | ........................... | रचयिष्यामः | ........................... | उत्तमः |

**(4) धातुसाधित-विशेषण-तालिका। (6 तः 4)** 2

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| ज्ञा (9 प.प.) | .................... | ज्ञातवान् | .................... | जानन् |
| पत् (1 प.प.) | पतितः | .................... | पतनीयः | .................... |
| प्रच्छ् - पृच्छ् (6 प.प.) | .................... | .................... | प्रष्टव्यः | पृच्छन् |

**(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 3)** [9]

**(1) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 तः 3)** 3

(क) .................... (3) महिलाः जलमाहर्तुं गच्छन्ति। (सङ्ख्यावाचकम्)

(ख) पौषमासः संवत्सरस्य .................... (10) मासः। (क्रमवाचकम्)

(ग) अहम् एकं पाठं .................... (2) सम्यक् पठामि। (आवृत्तिवाचकम्)

(घ) भवने मम गृहं .................... (7) तले वर्तते। (क्रमवाचकम्)

(च) अस्माकं कुटुम्बं संवत्सरस्य .................... (1) पर्यटनार्थं गच्छति। (आवृत्तिवाचकम्)

**(2) समासानां तालिकापूर्तिं कुरुत। (5 तः 3)** 3

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | निद्रामग्नः | ........................... | सप्तमी-तत्पुरुषः। |
| (ख) | हस्तस्थम् | हस्ते तिष्ठति इति। | ........................... |
| (ग) | अनावश्यकम् | ........................... | नञ्-तत्पुरुषः। |
| (घ) | ........................... | विविधानि बीजानि। | कर्मधारयः। |
| (च) | प्रतिदिनम् | दिने दिने | ........................... |

**(3) समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 तः 3)** 3

(क) नदी = ...........................। (ख) स्तुतिः × ...........................।

(ग) तुरगः = ...........................। (घ) उपकारकम् × ...........................।

(च) शीघ्रम् = ...........................।

**(4) सूचनानुसारं कृतीः कुरुत। (5 तः 3)** 3

(क) तयोः विवादं श्रुत्वा सुदासो व्यमृशत्। (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

(ख) राक्षसेभ्यः जनकस्य सुतां हृत्वा पुरीं ययौ। (वाक्यं लङ्लकारे परिवर्तयत।)

(ग) त्वं प्रयत्नेन कृषिकार्यं करोषि। ('त्वं' स्थाने 'भवान्' योजयत।)

(घ) अन्धकारः नश्यति। (सूर्यः) (णिजन्तं कुरुत।)

(च) अहं वाणिज्यशाखायाः स्नातकः। (वाक्यं बहुवचने परिवर्तयत।)

## षष्ठः विभागः- अपठितम्।

**(8)**

6. **(अ) गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)** [4]

अस्ति हेमप्रियः नाम भूपः। सः स्वनगरीम् आगतान् मुनिवरान् समुचितेन आतिथ्येन सर्वदा सन्तोषयति स्म। नृपस्य तस्य एकः एव दोषः। धनलुब्धः सः धनेन विना सर्वं तृणाय मन्यते स्म। एकदा कश्चन मुनिः हेमप्रियस्य प्रासादम् आगच्छति। नृपतिः तस्य मुनेः सत्कारं करोति। तुष्टः मुनिः वदति, "भूपते, तव आतिथ्येन प्रसन्नः अस्मि। अभीष्टं वरं वरयस्व" इति। लोभाविष्टः नृपतिः भाषते, "मुने, सुवर्णं मम अतीव प्रियम्। यद् यद् हस्तेन स्पृशामि तद् तद् अखिलं सुवर्णमयं भवतु इति मे इच्छा।" "तथास्तु" इति मुनिः वदति निष्क्रामति च।

**(1) पूर्णवाक्येन उत्तरं लिखत।** 1

नृपः मुनिवरान् कथं सन्तोषयति स्मः?

**(2) प्रातिपदिकं लिखत।** 1

(क) तृणाय (ख) सः

**(3) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

नृपतिः मुनेः अपमानं करोति।

**(4) माध्यमभाषया सरलार्थं लिखत।** 1

"मुने, सुवर्णं मम अतीव प्रियम्।"

(5) **गद्यांशात् षष्ठी-विभक्त्यन्तपदं चिनुत लिखत च।** 1

(6) **कारकपरिचयं कुरुत।** 1

<u>मुनि:</u> वदति निष्क्रामति च।

(आ) (1) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** [2]

| |
|---|
| उमादेवी यस्य माता शङ्कर: च पिता तथा।<br>मूषको वाहनं यस्य स मां पातु गजानन:।। |

(क) **पूर्णवाक्येन उत्तरं लिखत। (2 त: 1)** 1

(1) गजाननस्य माता का?

(2) गजाननस्य वाहनं किम्?

(ख) **समानार्थकं शब्दं लिखत।** 1

शङ्कर: = ........................।

(आ) (2) **पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** [2]

| |
|---|
| शनै: विद्या शनै: वित्तं शनै: पर्वतमूर्धनि।<br>शनै: कन्था: शनै: पन्था: पञ्च एतानि शनै: शनै:। |

